निस्वनः, पुं, (नि+स्वन+"नौ गदनदपठस्वनः ।" ३ । ३ । ६४ । इति अप् ।) शब्दः । इत्यमरः । १।६।२३ ॥ (यथा, महाभारते । ७ । २६ । ३ ।
"यथा प्राग्ज्योतिषो राजा गजेन मधुसूदन ।
त्वरमाणोऽभिनिष्क्रान्तो ध्रुवं तस्यैव निस्वनः ॥")

निस्वानः, पुं, (नि+स्वन+पक्षे घञ् ।) शब्दः । इत्यमरः । १ । ६ । २३ ॥

निहननं, क्ली, (नि+हन+ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११४ ॥

निहन्ता, [ऋ] त्रि, (नि+हन+तृच् ।) हननकर्त्ता । यथा, भट्टिः ।
"निहन्ता वैरकाराणां सतां बहुकरः सदा ।
पारम्वधिकरामस्य शक्तेरन्तकरो रणे ॥"
(महादेवे, पुं । यथा, महाभारते । १३ । १७ । ७५
"भगहारी निहन्ता च कालो ब्रह्मा पिता-[महः ।")

निहाका, स्त्री, (नियतं जहाति भुवमिति । नि+हा त्यागे+"नौ हः ।" उणां ३ । ४४ । इति कन् ।) गोधिका । इत्यमरः ।१।१०।२२॥ (यथा, ऋग्वेदे । १० । ९७ । १३ ।
"साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥")

निहारः, पुं, (नितरां ह्रियन्ते पदार्था येन । नि+हृ+घञ् ।) नीहारः । इति शब्दरत्नावली ॥

निहितं, त्रि, (नि+धा+क्त । "दधातेर्हिः ।" ७ । ४ । ४२ । इति हिः ।) स्थापितम् । इति हलायुधः ॥ यथा, महाभारते ।३।३१२।११२ ।
"धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"

निहिंसनं, क्ली, (नि+हिन्स+भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११३ ॥

निहीनः, त्रि, (नितरां हीनः । कुगतीति समासः ।) नीचः । पामरः । इत्यमरः ।२।१०।१६॥ (यथा, महाभारते । ३ । १२ । ११९ ।
"त इमे सिंहविक्रान्ता वीर्य्येणाभ्यधिकाः परैः ।
निहीनैः परिक्लिश्यन्तीं समुपेक्षन्ति मां कथम् ॥")

निह्नवः, पुं, (निह्नूयते सत्यवाक्यमनेनेति । नि+ह्नु+"ऋदोरप् ।" ३ । ३ ।५७ । इति अप् ।) अपलापः । येन वचनं निह्नूयते सः । यथा, धारयन्नेव न धारयामीति । इत्यमरभरतौ ॥ तत्पर्य्यायः । निह्नुतिः २ अपह्नुतिः ३ अपह्नवः ४ । इति शब्दरत्नावली ॥ (यथा, याज्ञवल्क्ये ।२।११।
"निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम् ॥")
निकृतिः । अविश्वासः । इति मेदिनी । वे, ३८ ॥ (यथा, महाभारते । ५ । ३७ । ३० ।
"न निह्नवं मन्त्रगतस्य गच्छेत्
संसृष्टमन्त्रस्य कुसङ्गतस्य ।")
शुमः । इति शब्दरत्नावली ॥ (शुद्धिः । यथा, मनुः । ९ । २१ ।
"ध्यायत्यनिष्टं यत् किञ्चित् पाणिग्राहस्य चेतसा ।
तस्यैष व्यभिचारस्य निह्नवः सम्यगुच्यते ॥")

निह्नुतिः, स्त्री, (नि+ह्नु+क्तिन् ।) निह्नवः । इति शब्दरत्नावली ॥

निह्रादः, पुं, (नि+ह्राद अव्यक्तशब्दे+घञ् ।) शब्दः । इत्यमरः ।१।६।२३॥ (यथा, रघुः ।१।४१।
"सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥")

निक्षणं, क्ली, (णिक्ष चुम्बने+भावे ल्युट् ।) चुम्बनम् ॥

निक्षा, स्त्री, (निक्षति चुम्बतीव मस्तकमिति । निक्ष+अच्+टाप् ।) लिक्षा । यूकः । इत्युणादिकोषः ॥ निकी इति भाषा ॥

निक्षिप्तं, त्रि, (निक्षिप्यते स्मेति । नि+क्षिप+क्तः ।) न्यस्तम् । तत्पर्य्यायः । परिक्षिप्तम् २ निवृतम् ३ परीतम् ४ परिवेष्टितम् ५ न्यस्तम् ६ निसृष्टम् ७ । इति जटाधरः ॥ स्थापितधनादि । यथा,—
"निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ।
राजा विनिर्णयं कुर्य्यादक्षिण्वन्न्यासधारिणम् ॥"
इति मनुः । ८ । १९६ ॥

निक्षेपः, पुं, (नि+क्षिप्+घञ् ।) क्षेपणम् । न्यासः । समर्पितवस्तु । गच्छितद्रव्य इति भाषा । तत्पर्य्यायः । उपनिधिः २ न्यासः ३ । इति हेमचन्द्रः ॥ यथा,—
"स्वद्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः ।
निक्षेपो नाम तत् प्रोक्तं व्यवहारपदं बुधैः ॥
असंख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥
निक्षेपं वृद्धिशेषञ्च क्रयं विक्रयमेव च ।
याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकं शतम् ॥"
इति मिताक्षरायां नारदः ॥ * ॥
"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः ॥
आधिः सीमा बालधनं निक्षेपोपनिधी स्त्रियः ।
राजस्वं श्रोत्रियस्वञ्च न भोगेन प्रणश्यति ॥
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ।
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥"
इति मनुः । ८ अध्याये ॥

नीकः, पुं, (नीयते इति । नी प्रापणे+"अजियुधूनीभ्यो दीर्घश्च ।" उणां ३ । ४७ । इति कन् ।) वृक्षविशेषः । इत्युणादिकोषः ॥

नीकारः, पुं, (नि+कृ+घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति उपसर्गस्य दीर्घः ।) न्यक्कारः । इति शब्दरत्नावली ॥

नीकाशः, त्रि, (नितरां काशते इति । नि+काश+अच् । "इकः काशे ।" ६ । ३ । १२३ । इति उपसर्गस्य दीर्घः ।) तुल्यः । उपमा । इत्यमरः ।२ । १० । ३७॥ (यथा, महाभारते । ३ । १८२ । १३ ।
"आकाशनीकाशतटां तीरवानीरसङ्कुलाम् ।
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम् ॥")
निश्चये, पुं । इति मेदिनी । शे, २३ ॥

नीचः, त्रि, (निकृष्टामीं कर्षीं शोभां चिनोतीति । चि+"अन्येभ्योऽपि दृश्यते ।"इति डः ।) हीनजातिकर्म्मा । वर्व्वरः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । विवर्णः २ पामरः ३ प्राकृतः ४ पृथग्जनः ५ निहीनः ६ अपसदः ७ जाल्मः ८ क्षुल्लकः ९ इतरः १० । इत्यमरः । २ । १० । १६ ॥ अपशदः ११ खुल्लकः १२ । इति भरतः ॥ हीनः १३ क्षुल्लः १४ क्षुद्रः १५ वेलकः १६ । इति शब्दरत्नावली ॥ नीचसङ्गदोषो यथा,—
"न प्राप्नोति सुखं किञ्चिन्नीचसङ्गान्महानपि ।
प्रेतसङ्गान्महादेवो नग्नो भस्मविभूषितः ॥
प्रविश्य निलयं नीचः स्त्रीधनादिकमिच्छति ।
स्वयं नेतुं न शक्नोति तदा नाशयति ध्रुवम् ॥
स्थिते गुणेऽपि नीचस्तु यत्नाद्दोषं प्रपद्यते ।
किञ्चित्तु सङ्गमासाद्य तद्युक्तं स्यात् सनातनम् ॥
सतां श्रुत्वा गुणं नीचः श्रोतुमायाति बन्धुवत् ।
ततः समयमासाद्य प्रकाशयति तद्वचन् ॥
मनस्येकं वचस्येकं कर्म्मण्येकं महात्मनाम् ।
मनस्यन्यद्वचस्यन्यत् कर्म्मण्यन्यद्दुरात्मनाम् ॥"
इति पाद्मे क्रियायोगसारे ५ अध्यायः ॥
अपि च ।
"बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ।
मध्यमे मध्यतां याति श्रेष्ठतां याति चोत्तमे ॥"
इति शान्तिपर्व्व ॥ * ॥
अनुच्चः । तत्पर्य्यायः । वामनः २ न्यक् ३ खर्व्वः ४ ह्रस्वः ५ । इत्यमरः ।३।१।७०॥ (यथा,—
"नीचरोमनखश्मश्रुर्निर्म्मलाङ्घ्रिमलायनः ।
स्नानशीलः सुसुरभिः सुवेशोऽनुल्वणोज्ज्वलः ।
धारयेत् सततं रत्नसिद्धमन्त्रमहौषधीः ॥"
इति वाभटे सूत्रस्थाने द्वितीयेऽध्याये ॥)
निम्नः । यथा,—
"शैत्यं नाम गुणस्तवैव सहजः स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे ।
किञ्चान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं
त्वञ्चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः ॥"
इति लक्ष्मणसेनः ॥ * ॥
चोरकनामगन्धद्रव्ये, पुं । इति राजनिर्घण्टः ॥

नीचकः, त्रि, (नीच एव । नीच+स्वार्थे कन् ।) वामनः । खर्व्वः । इति शब्दरत्नावली ॥

नीचका, स्त्री, (निकृष्टामीं शोभां चकति प्रतिहन्तीति । चक प्रतिघाते+अच् । टाप् ।) नैचिकी । उत्तमगवी । इत्यमरटीकायां भरतः ॥

नीचकी, [न्] पुं, उच्चः । उपरिभागः । इति हलायुधः ॥ उत्तमगवीमांश्च ॥

नीचकैः, [स्] अ, (नीचैस्+"अव्ययसर्व्वनाम्नामकच् प्राक् टेः ।" ५ । ३ । ७१ । इति टेः प्रागकच् ।) नीचैः । नीचैः शब्दस्य टेः पूर्व्वकृतेनाका निष्पन्नः । यथा, उच्चकैरित्यादि ॥

नीचगं, क्ली, (नीचं निम्नदेशं गच्छतीति । गम+डः ।) जलम् । इति कोषान्तरम् ॥ पामरे, त्रि ॥